সুদুর্লভমিতি অমন্যত ॥

৫/ ইদং কিলাব্যাজমনোহরং বপুঃ তপক্ষমং সাধয়িতুং যঃ ইচ্ছতি।
**ধ্রুবং সঃ নীলোৎপলপত্রধারয়া শমীলতাং ছেত্তুমৃষির্ব্যবস্যতি ॥ (১/১৭)**

শ্লোকোঽয়ং মহাকবিকালিদাসকৃতস্য অভিজ্ঞানশকুন্তলম্ নাম নাটকস্য প্রথমে অংকে সমুপলভ্যতে। কুসুমপেলবাং শকুন্তলাম্ আশ্রমস্য শ্রমসাধ্যে কর্মণি নিযুক্তাং দৃষ্ট্বা রাজর্ষিঃ দুষ্যন্তঃ তত্রভবন্তং কাশ্যপং দূষয়ন্নাহ—ইদমিতি।

যঃ ঋষিঃ কণ্বঃ অব্যাজম্ আহার্যশোভারহিতং মনোহরং নিসর্গসুন্দরং চ ইদং বপুঃ শরীরং তপসঃ ক্ষমং যোগ্যং সাধয়িতুং কর্ত্তুমিচ্ছতি অভিলষতি, স কণ্বঃ ধ্রুবং নিশ্চিতমেব নীলোৎপলস্য ইন্দীবরস্য যৎ পত্রম্ অতিপেলবং তস্য ধারয়া প্রান্তভাগেন শমীলতাং শম্যাঃ বৃক্ষবিশেষস্য লতাং শাখাং ছেত্তুং ব্যবস্যতি উদ্যচ্ছতে। অতিপেলবস্য পদ্মদলস্য পার্শ্বভাগেন কঠিনশমীশাখাং ছেত্তুং যঃ চেষ্টতে স যথা উপহাস্যতাং যাতি, তথা কুসুমকোমলাং শকুন্তলাং তপোবনস্য কঠিনকর্মসু নিযুজ্য মহর্ষিঃ কণ্বঃ অপি সর্বেষাম্ উপহাসভাজনং ভবতি ইতি নির্গলিতোঽর্থঃ। অত্র নিদর্শনানাম অর্থালংকারঃ ॥

Scanned with CamScanner